श्री

हरिः ॐ

शन्नोमित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो ब्रहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मां। अवतु वक्तारं। ॐ शान्तिः शान्तिः शान्तिः ॥१

शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः॥ २

सहनौ यशः। सहनौ ब्रह्म वर्चसम्। अथातः सꣳहिताया उपनिषदम् व्याख्यास्यामः। पञ्चस्वधिकरणेषु। अधिलोकमधिज्यौतिष मधिविद्य मधिप्रज मध्यात्मम्। ता महासꣳहिता इत्या चक्षते। अथाधिलोकम्। पृथिवी पूर्व रूपम्। द्यौरुत्तर रूपम्। आकाशः सन्धिः॥३

वायुः सन्धानम्। इत्यधिलोकम्। अथाधि ज्यौतिषम्। अग्निः पूर्वरूपम्। आदित्य उत्तर रूपम्। आपः सन्धिः। वैद्युतस्सन्धानम्। इत्यधिज्यौतिषम्। अथाधि विद्यम्। आचार्यः पूर्व रूपम्। ४

अन्तेवास्युत्तर रूपम्। विद्या सन्धिः। प्रवचनꣳ सन्धानम्। इत्यधि विद्यम्। अथाधि

प्रजम्। माता पूर्व रूपम्। पितोत्तर रूपम्। प्रजा सन्धिः। प्रजननꣳ सन्धानम्। इत्यधि प्रजम्॥५

अथाध्यात्मम्। अधराहनुः पूर्वरूपम्। उत्तराहनुरुत्तर रूपम्। वाक्सन्धिः। जिह्वा सन्धानम्। इत्यध्यात्मम्। इतीमा महासꣳहिताः। य एवमेता महासꣳहिता व्याख्याता वेद। सन्धीयते प्रजया पशुभिः। ब्रह्म वर्चसेनान्नाद्येन सुवर्ग्येण लोकेन॥ ६

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृताथ्सम्बभूव। समेन्द्रो मेधयास्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरम् मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्याम् भूरि विश्रुवम्। ब्रह्मणः कोशोसि मेधया पिहितः। श्रुतम् मे गोपाय। आवहन्ती वितन्वाना॥ ७

कुर्वाणा चीरमात्मनः वासाꣳसि ममगावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा। आमायन्तु ब्रह्मचारिण स्वाहा॥ ८

यशोजनेऽसानि स्वाहा। श्रेयान् वस्य सोऽसानि स्वाहा। तं त्वा भग प्रविशानि स्वाहा। समा भग प्रविश स्वाहा। तस्मिन् सहस्र शाखे। निभगाऽहं त्वयि मृजे स्वाहा। यथाऽऽपः प्रवताऽऽयन्ति। यथामासा अहर्जरम्। एवं मां ब्रह्म चारिणः। धातरायन्तु सर्वतस्स्वाहा। प्रतिवेशोऽसि प्रमाभाहि प्रमापद्यस्व॥ ९

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामुहस्मै तां चतुर्थीं। माहाचमस्यः
प्रवेदयते। मह इति। तद् ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः। भूरिति वा अयं
लोकः। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः॥ १०

मह इत्यादित्यः आदित्येन वाव सर्वे लोका महीयन्ते। भूरिति वा अग्निः। भुव इति
वायुः। सुवरित्यादित्यः। मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतिꣳषि
महीयन्ते। भूरिति वा ऋचः। भुव इति सामानि। सुवरिति यजूꣳषि॥ ११

मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते। भूरितिवै प्राणः। भुव इत्यपानः।
सुवरिति व्यानः। मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते। ता वा
एताश्चतस्रश्चतुर्धा। चतस्रश्चतस्रो व्याहृतयः। ता यो वेद। स वेद ब्रह्म। सर्वेऽस्मै देवा
बलिमावहन्ति॥ १२

स य एषोऽन्तर्हृदय आकाशः। तस्मिन् नयम् पुरुषो मनोमयः। अमृतो हिरण्मयः।
अन्तरेण तालुके। य एषस्तन इवावलम्बते। सेन्द्रयोनिः। यत्रासौकेशान्तो विवर्तते।
व्यपोह्य शीष्कपाले। भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ॥ १३

सुवरित्यादित्ये। मह इति ब्रह्मणि। आप्नोति स्वराज्यम्। आप्नोति मनसस्पतिम्।
वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर् विज्ञानपतिः। एतत् ततो भवति। आकाश शरीरम् ब्रह्म।

सत्यात्म प्राणारामम् । मन आनन्दम् । शान्ति समृद्धममृतम् । इति प्राचीन
योग्योपास्व ॥ १४

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः । अग्निर्वायुरादित्यश् चन्द्रमा नक्षत्राणि । आप
ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् । प्राणोव्यानोऽपान
उदानः समानः । चक्षुः श्रोत्रम् मनो वाक् । त्वक् चर्ममाꣳसꣳस्नावाऽस्थि मज्जा ।
एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इतꣳसर्वम् । पाङ्क्तेनैव पाङ्क्तꣳस्पृणोतीति ॥ १५

ओमिति ब्रह्म । ओमितीदꣳसर्वम् । ओमित्येत दनुकृति हस्म वा
अप्योश्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओꣳशोमिति शस्त्राणि
शꣳसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति ।
ओमितियग्निहोत्रमनु जानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्न वानीति ।
ब्रह्मैवोपाप्नोति ॥ १६

ऋतं च स्वाध्याय प्रवचने च । सत्यं च स्वाध्याय प्रवचने च । तपश्च स्वाध्याय प्रवचने
च । दमश्च स्वाध्याय प्रवचने च । शमश्च स्वाध्याय प्रवचने च । अग्नयश्च स्वाध्याय
प्रवचने च । अग्निहोत्रञ्च स्वाध्याय प्रवचने च । अतिथयश्च स्वाध्याय प्रवचने च । मानुषञ्च
स्वाध्याय प्रवचने च । प्रजा च स्वाध्याय प्रवचने च । प्रजनश्च स्वाध्याय प्रवचने च ।
प्रजातिश्च स्वाध्याय प्रवचने च । सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यः

पौरुशिष्टिः। स्वाध्याय प्रवचने एवेति नाको मौद्गल्यः। तध्दि तपस्तध्दि तपः॥ १७

अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठङ्गिरेरिव। ऊर्ध्वपवित्रो वाजिनीवस्वमृतमस्मि।
द्रविण<sup>ꣳ</sup>सवर्चसम्। सुमेधा अमृतोइति त्रिशङ्कोर्वेदानु वचनम्॥ १८

वेदमनूच्याचार्योऽन्तेवासिनमनु शास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।
आचार्याय प्रियं धनमा हृत्य प्रजातन्तुं। माव्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न
प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय प्रवचनाभ्यान्न
प्रमदितव्यम्॥१९

देव पितृ कार्याभ्यां न प्रमदितव्यम्। मातृ देवो भव। पितृ देवो भव। आचार्य देवो भव।
अतिथि देवो भव। यानि अनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि।
यान्यस्माकꣳसुचरितानि। तानि त्वयोपास्यानि॥२०

नो इतराणि। ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः। तेषां त्वयाऽसनेन प्रश्वसि तव्यम्।
श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा
देयम्। अथयदि ते कर्म विचिकित्सा वृत्त विचिकित्सा वास्यात्॥ २१

ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामास्स्युः। यथा ते तत्र

वर्तेरन्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामास्स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमुचैतदुपास्यम्॥ २२

शन्नो मित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषं। ऋतमवादिषं। सत्यमवादिषं। तन् मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः॥

हरिः ॐ (३)